PAPER - 4

# MT

Seat No. | | | | | | | |

2018 .... .... 1200

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - PRELIM - I PAPER - IV**

**Time : 3 Hours** **(Pages 9)** **Marks : 80**

## प्रथमः विभागः - गद्यम् ।

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

देशविदेशेभ्यः पर्यटकाः आगच्छन्ति यतः ...... ।

(क्षेत्रं विस्तीर्णमस्ति । / ते पक्षिविषये ज्ञातुमिच्छन्ति ।)

II) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

नैके खगाः अभयारण्यम् आगत्य वसन्तसमये वसन्ति ।

III) पूर्णवाक्येन उत्तरत । १

पक्षिमित्रैः वलयाङ्कनं किमर्थं कृतम् ?

एतावद् विशालं वनं द्रष्टुं द्वित्राः दिनाः न पर्याप्ताः, यतोऽस्य क्षेत्रं विस्तीर्णं वैविध्यपूर्णं च। विविधस्वरूपाणां खगानां कृते विविधप्रकाराणि स्थलानि अत्र निर्मितानि। स्थलपक्षिणां शुष्का तृणस्थली, जलविहगार्थं जलस्थली, आनूपं वा स्थलम् अपि च वृक्षखगानामधिवासभूताः महावृक्षा अपि अत्र विद्यन्ते । नैकानि सारङ्गागाराणि विविधवर्णैः खगैः आवासार्थमङ्गीकृतानि अत्र । वृक्षपक्षिणः, तृणपक्षिणः अपि च जलपक्षिणोऽपि अत्र बहुसंख्यया वसन्ति । तेषां त्रिशतषट्षष्टिमिताश्च प्रजातयः सुखेन वसन्ति क्रीडन्ति च । तित्तिरसदृशाः तृणपक्षिणः क्रीडन्तः दृश्यन्ते । वृक्षेषु चित्रबलाकानां कुलानि कलकलं कुर्वन्ति पर्यटकानां चेतांसि हरन्ति। विविधप्रकारकाः क्रौञ्चाः तृणेषु भक्ष्यं गवेषमाणाः दूरतः नयनपथमायान्ति । जलेषु खगानां बहवः जातिविशेषाः विहरन्तः दृश्यन्ते । श्वेतः चमसचञ्चूः इति पक्षिविशेषः सविशेषं लक्ष्यते । अन्येऽपि पक्षिणोऽत्र शीतवासार्थं देशान्तरादपि आयान्ति । सैबेरियादेशात् आगच्छन्तः अत्र शीतर्तौ वसन्तः क्रौञ्चाः अधुना नामशेषतां गताः इति तु दुःखकरं लज्जास्पदमपि । लद्दाखप्रान्तादपि नैके खगा आगत्य अत्र हिमसमये वसन्ति । एतान् स्थलान्तरितान् खगान् द्रष्टुं तेषां विषये चाधिकं ज्ञातुं पर्यटकाः अभ्यासकाश्च बहुसंख्ययात्र आगच्छन्ति देशविदेशेभ्यः । तेषामध्ययनार्थं वलयाङ्कनमपि कृतं वर्तन्ते पक्षिमित्रैः ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) रिक्तस्थानपूर्तिं कुरुत । १

१) त्रिशतषट्षष्टिमिताश्च - ......। (त्रिशतषट् + षष्टिमिताश्च, त्रिशतषट्षष्टिमिताः + च)

२) देशान्तरादपि - ......। (देशान्तराद + अपि, देशान्तरात् + अपि, देशान्तरात + अपि)

II) चतुर्थपदं लिखत । १

१) जातिविशेषाः : विहरन्तः :: चमसचञ्चूः : ...... ।

२) तृणस्थली : शुष्का :: वनम् : ...... ।

III) गद्यांशतः विलोमपदं लिखत । १

१) अभिमानास्पदम् x ...... । २) निर्गत्य x ...... ।

IV) गद्यांशे आगते हेत्वर्थक-धातुसाधित-अव्यये लिखत । १

३. **पृथक्करणम् ।** २




**प्र.१. ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **अवबोधनम् ।**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

जनाः अधुना गृहे ग्रन्थान् न आनयन्ति यतः ...... ।

(ग्रन्थानां वाचनं न लाभदायकम् / अन्तर्जाले ग्रन्थाः उपलभ्यन्ते)

II) पूर्णवाक्येन उत्तरत । १

अनेन तन्त्रज्ञानेन किं समुपलभ्यते ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

सङ्गणकीयपत्रेण सन्देशप्रेषणं शीघ्रतया भवति ।

नानाशास्त्रकलानां ज्ञानं, वैश्विकवार्ताः, विविधसंस्थानां विभागानां च संज्ञापनं, सहस्रशः ग्रन्थाः, पर्यटनार्थमुपयुक्तज्ञानमासनारक्षणं च, दूरस्थानां दर्शनं तैश्च सह संभाषणं, सामान्यज्ञानं चेति समुपलभ्यतेऽनेन तन्त्रज्ञानेन । एष आधुनिकः कल्पवृक्षःअस्मभ्यं /अस्मासु सर्वविधं संज्ञापनं वितरति । सांख्यिकीयं ज्ञानं तथा सङ्गणकयन्त्रस्य 'सॉफ्टवेअर' इति कार्यक्रमोऽपि अन्तर्जाले उपलब्धो भवति । तस्य साहाय्येन विविधविषयकाणि नानाकार्याणि विना कर्गजं शीघ्रतया सहजतया विना प्रमादं स्वल्पमानवीयबलेन कर्तुं शक्नुवन्ति सर्वे जनाः । अधुना आर्थिकमन्दायने तु सङ्गणकीयवाणिज्यं वरदानमेवेति सिद्धम् । आयुर्विमा-विद्युद्-दूरदर्शन-दूरध्वनि-सेवाशुल्कानि तथा विविधव्यवहारार्थं धनस्य हस्तान्तरणमनेन तन्त्रज्ञानेन कर्तुं शक्नुमो वयम् । एतदर्थं सद्यस्क-कुसीदवृत्तिः अवलम्ब्यते । जनाः सङ्गणकीयपत्रेण सत्वरं स्वसन्देशं प्रेषयन्ति तथा सद्यस्क-आलापमपि कुर्वन्ति। एवं ज्ञानवृद्धिकरः वरः खलु एषः । अस्यान्तर्जालस्योपयोगः केवलं मानवहितायैव भवतु ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) गद्यांशात् विलोमशब्दान् चित्वा लिखत । १

१) विलम्बेन २) क्षयः

II) समूहेतरपदं लिखत । १

१) विना, सह, ऋते ।

२) वरः, वचः, आशीर्वचः ।

III) गद्यांशात् द्वे सप्तम्यन्तपदे चित्वा लिखत । १

IV) योग्यसंस्कृतशब्दं लिखत । १

| सङ्गणकीयपरिभाषा | संस्कृतप्रतिशब्दाः |
|---|---|
| E-mail | ............. |
| Online Banking | ............. |

**३. स्वमतप्रकटनम् ।** २

'सङ्गणकः आधुनिकः कल्पवृक्षः' एतस्मिन् विषये भवत्प्रतिक्रियां माध्यमभाषया ३०-४० शब्दैः लिखत ।

**प्र.१. क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

बालनरेन्द्रः आत्मानम् अपराधिनम् अमन्यत यतः .......... । (तस्य हस्तात् च्युता भग्ना मूर्तिः तेन मार्गे एव त्यक्ता / तेन दुर्गापूजायाः महोत्सवः न दृष्टः)

II) कः कं वदति ? १

विरम शोकात् ।

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

बालिका मन्दिरे खेलने मग्ना ।

जिज्ञासुः विचारशीलः बालनरेन्द्रः सदैव चिन्तनमग्नः आसीत् । एकदा मात्रादिष्ट दुर्गादेव्याः मूर्तिं क्रीत्वा स गृहमागच्छत् । दुर्गापूजामहोत्सवं नाम शक्तिपूजनमिति स जानाति स्म । गृहं निवर्तमानः सः शक्तेः स्वरूपचिन्तने मग्नोऽभवत् । अकस्मात् तस्य विचारमाला खण्डिता तुरगपदानां रवेण । तेन दृष्टं यत् मण्डलाधिकारिणः अश्वयानं मार्गे वेगेन धावति इति । स्वसंरक्षणाय स मार्गाद् दूरं गन्तुं प्रायतत । सहसा तेन दृष्टं यत् काचन बालिका मार्गे खेलने मग्नास्ति । सा अश्वयानागमनविषये न जानाति । सवेगम् अश्वयानं तस्याः कृते यमयानमेव। तद्विलोक्य नरेन्द्रस्य हस्ताद् मूर्तिः पतिता । तेन धावित्वा झटिति सा बालिका अश्वमार्गाद् दूरीकृता तस्याः मात्रे च प्रदत्ता । तस्याः मात्रा अश्रुपूर्णनयनाभ्यां तस्मै आशीर्वचनं दत्तम् ।

यदा स गृहमागतः तदा तेन ज्ञातं यत् तस्य हस्तात् च्युता मूर्तिः तत्रैव मार्गे भग्ना वर्तते । आत्मानमपराधिनं मत्वा स मात्रे सर्वमकथयत् । तदा मात्रोक्तं ''वत्स नरेन्द्र, विरम शोकात्। यद्यपि त्वया मूर्तेः पूजा न कृता तथापि बालिकायाः साहाय्यं कृत्वा, बालिकारूपशक्तिदेवतायाः एव पूजनं कृतम् ।'' धन्या सा माता धन्यश्च बालनरेन्द्रः ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) रिक्तस्थानपूर्तिं कुरुत । १

मात्रोक्तम् - ...... + ...... । (मातृ + उक्तम् / मात्र + उक्तम् / मात्रा + उक्तम्)

II) गद्यांशात् पर्यायशब्दान् चित्वा लिखत । १

१) ध्वनिना - ...... । २) वाहनम् - ...... ।

III) समूहेतरं पदं चिनुत । १

१) भग्ना, खण्डिता, पतिता । २) विलोक्य, वीक्ष्य, आकर्ण्य ।

IV) विशेषण - विशेष्य - अन्वितिः । (मेलनं कुरुत ।) १

भित्तिः निश्चलः
सिद्धान्तः उन्नता
महान्

**३. पृथक्करणम् । क्रमानुसारं लिखत ।** २

i) बालिकारक्षणम् ।
ii) अश्वयानदर्शनम् ।
iii) मूर्तिक्रयणम् ।
iv) मात्रोपदेशः ।

**द्वितीयः विभागः - पद्यम् ।**

**प्र.२. अ) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. पृथक्करणम् ।** २

परोऽपि हितवान् → [ ]

[ ] → परः

मुहूर्तं ज्वलितं श्रेयो न च धूमायितं चिरम् ।
मा ह स्म कस्यचिद् गेहे जनि राज्ञः खरो मृदुः ।।१।।
परोऽपि हितवान्बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ।।२।।

२. **तात्पर्यलेखनम् ।** २

'मुहूर्तं ज्वलितं श्रेयः' अस्याः कल्पनायाः स्पष्टीकरणं माध्यमभाषया लिखत ।

**प्र.२. ब) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **शब्दज्ञानम् ।**

I) पर्यायपदं लिखत । १

१) रजनी - .......... । २) प्रत्यहम् - .......... ।

II) विशेषणे लिखत । १

धर्मः - .......... , .......... ।

> धर्मः सर्वसुखाकरो हितकरो धर्मं बुधाश्चिन्वते
> धर्मेणैव समाप्यते शिवसुखं धर्माय तस्मै नमः ।
> धर्मान्नास्त्यपरः सुहृद् भवभृतां धर्मस्य मूलं दया
> धर्मे चित्तमहं दधे प्रतिदिनं हे धर्म मां पालय ॥१॥
> अङ्गेन गात्रं नयनेन वक्त्रं न्यायेन राज्यं लवणेन भोज्यम् ।
> धर्मेण हीनं खलु जीवितञ्च चन्द्रं विना भाति तथा न रात्रिः ॥२॥

२. **अन्वयपूर्तिं कुरुत ।** २

धर्मः सर्वसुखाकरः, हितकरः । ...... धर्मं चिन्वते । धर्मेण एव शिवसुखं समाप्यते । तस्मै धर्माय नमः। धर्मात् ...... भवभृतां ...... न अस्ति । धर्मस्य मूलं ...... (अस्ति) । अहं प्रतिदिनं धर्मे चित्तम् दधे । हे धर्म, (त्वम्) मां पालय ।

**क) द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) ज्ञानेन .............. महानुभावाः ॥

ii) अणुपूर्वं .............. कुरु ॥

iii) समुपागतवति .............. महामान्यः ॥

**ड) वृत्तनाम चिनुत ।** १

> वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ।
> न हि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम् ॥

अस्य श्लोकस्य वृत्तनाम ............... इति ॥ (उपेन्द्रवज्रा / इन्द्रवज्रा / गीतिः)

**तृतीयः विभागः - स्थूलवाचनम् ।**

**प्र.३. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **अवबोधनम् ।**

I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

हिन्दी एव राष्ट्रभाषा भवेत् इति डॉ. आंबेडकरमहोदयस्य मतम् आसीत् ।

II) एकपदेन उत्तरं लिखत । १

भीमरायस्य का नवा धुर् ?

लब्धे च स्वातन्त्र्ये नेहरुणा मन्त्रिमण्डलं रचितम् ।
विधिमन्त्रिपदे धीमान् नियोजितः श्रीभीमरायः ।।१।।
घटनासमितिप्रमुखो बभार भव्यां नवां धुरं भीमः ।
श्रमभारं नागणयन्नित्यं निरतोऽपि निजकार्ये ।।२।।
प्रियसंस्कृतवाग्भीमः कामं जानन् विबुधवाङ्महत्ताम् ।
ऐच्छत् तां स्थापयितुं हिन्दीव राष्ट्रवाचः पदे ।।३।।
दलितमहासङ्घस्य च कार्यसभायां तदा भीमरायः ।
प्रस्तावोपन्यासं कृतवान् गीर्वाणवाग्विषयम् ।।४।।

२. **पृथक्करणम् ।** २




**चतुर्थः विभागः - लेखनकौशल्यम् ।**

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

अ) **कथापूर्तिः ।**

**मञ्जूषातः उचितशब्दान् चित्वा कथां पुनर्लिखत ।** ५

शब्दानां माधुर्यं स्वर्गं प्रापयति कटुता च ....... पातयति । एक एव शब्दः जीवनं विभूषयेत् उतान्यः शब्दः जीवनं नाशयेत् । एकदा द्वयोः ....... मध्ये विवादः उत्पन्नः। तौ न्यायालयं गतौ । तयोरेकः अचिन्तयदहं लक्षं ....... स्यूते स्थापयित्वा न्यायाधीशस्य गृहं गतवान् । न्यायाधीशस्तस्य मन्तव्यं ज्ञात्वा क्रुद्धोऽभवत् । धनिकोऽवदत् भोः, मत्सदृशाः लक्षरूप्यकाणां दातारः दुर्लभाः एव । न्यायाधीशः अवदत् लक्षरूप्यकाणां ....... कदाचिदन्येऽपि भवेयुः परं लक्षरूप्यकाणां निराकर्तारः मत्सदृशाः अन्ये विरला एव । अतः कृपया .......।

( गच्छतु, नरके , धनिनोः , रूप्यकाणि , दातारः )

ब) **३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

i) मम प्रियः कविः । ii) पर्वतः । iii) वृत्तपत्रमहिमा ।

**क) संस्कृतानुवादः ।**

**८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत ।** ५

i) We will sit in the shadow of the tree.
ii) I saw a tiger in the dense forest.
iii) A cloth-bag is always with me.
iv) Proper diet is essential for growth of the body.
v) Trees make the passers-by happy by their shadow.
vi) Let your fame ever increase.
vii) Anger is pacificed by soft speech.
viii) Birds build nests on branches of trees.

**ड) वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१) रक्ष् (१ प.प.) २) वि + रम् (१ प.प.)
३) वि + तॄ (१ प.प.) ४) सम् + ऋ (१ प.प.)

ii) अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१) ग्रामस्य दूरं पाठशाला अस्ति ।
२) देशाय कृते सैनिकः प्राणान् त्यजति ।
३) अध्ययने विना ज्ञानम् अशक्यम् ।
४) गृहाय प्रति बालकः धावति ।

**पञ्चमः विभागः - व्याकरणम् - उपयोजनकौशल्यम् ।**

**प्र.५ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

**अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | द्वितीयः भविष्यकालः | परोक्षः भूतकालः | वर्तमानकालः | प्रथमः भूतकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| क्षिप् ६ प.प. | ...... | ...... | क्षिपति | ...... | क्षिपतु | ...... |
| दा ३ आ.प. | ...... | ...... | ...... | अदत्त | ...... | ददीत |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सप्तमी (स्त्री.) | ...... | सर्वयोः | ...... |
| पञ्चमी | ...... | ...... | युष्मत् |
| तृतीया | त्वचा | ...... | ...... |
| षष्ठी | ...... | शशिनोः | ...... |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

(उप्ता, श्रुतवान्, ज्ञातवती, श्राव्यः, जानन्, इष्टम्, स्मरणीयः, मुञ्चन्ती)

**ड) समासाः ।**

**कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | समस्तपदम् | समासविग्रहः | समासनामानि |
|---|---|---|---|
| i) | विपक्षः | विरुद्धः पक्षः । | .................... |
| ii) | ............. | सुखं च दुःखं च । | इतरेतर द्वन्द्व |
| iii) | नीलकण्ठः | .................... । | बहुव्रीहि |
| iv) | ............ | न आसक्तिः । | नञ् तत्पुरुष |
| v) | मधुपाः | मधु पिबन्ति इति । | .................... |
| vi) | ............. | चिन्तया सहितः । | सह बहुव्रीहि |
| vii) | पञ्चखट्वी | .................... । | द्विगु |
| viii) | दुर्गादेवी | .................... । | कर्मधारय |

**इ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) दैवे दुर्बलतां गते तृणमपि प्रायेण वज्रायते । (सतिसप्तमीरचनां निष्कासयत ।)

ii) मया चीवरम् उपयोजितम् । (प्रयोगं परिवर्तयत ।)

iii) राष्ट्रध्वजः मां कीर्तिकथाः स्मारयति । (प्रयोजकं निष्कासयत ।)

iv) त्वं विजयिनी भव । ('त्वम्' स्थाने 'भवती' उपयोजत ।)

**फ) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) मार्गे .................. वाहनानि सन्ति । (4)

ii) वर्षस्य ................. मासाः भवन्ति । (12)

iii) मया .................. विदेशयात्रा न कृता । (once)

iv) गीतायाः ............... अध्यायः मया पठितः । ($18^{th}$)

**षष्ठः विभागः - अनुवादकौशल्यम् ।**

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

एकदा दुर्बुद्धिः आनन्दमग्नं सुबुद्धिम् अपृच्छत्, ''भवतः आनन्दस्य शान्तेश्च किं रहस्यम्?'' सुबुद्धिः उवाच, ''मित्र। मम चत्वारः अङ्गरक्षकाः सन्ति। प्रथमं तु सत्यं यत् माम् अपराधात् सर्वदा रक्षति। द्वितीयः स्नेहः, अहं सर्वान् कर्मचारिणः पुत्रवत् मन्ये। तृतीयः न्यायः, यः मामन्यायात् रक्षति। चतुर्थः त्यागः, मां दानाय प्रेरयति। अतः एतेषां सहायतया अहं सर्वदा आनन्देन जीवामि लोकहितं च करोमि इति।'' दुर्बुद्धिः श्रद्धया तस्य चरणयोः अपतत्।

**ब) संस्कृतपद्यांशौ पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

अतीतलाभस्य सुरक्षणार्थं भविष्यलाभस्य च सङ्गमार्थम् ।
आपत्प्रपन्नस्य मोक्षणार्थं यन्मन्त्र्यतेऽसौ परमो हि मन्त्रः ।।१।।
हृदयानि सतामेव कठिनानीति मे मतिः ।
खलवाग्विशिखैस्तीक्ष्णैर्भिद्यन्ते न मनागपि ।।२।।

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

राजा – तेन हि प्रस्तूयतां विवादः।
देवी – यदि मां पृच्छसि एतयोर्विवाद् एव मे न रोचते।
गणदासः – देवि न मां समानविद्यतः परिभवनीयम् अवगन्तुमर्हसि।
विदूषकः – भवति पश्यामि उरभ्रसंपातम्। किं मुधा वेतनदानेन।
देवी – ननु कलहप्रियोऽसि।

**Best of Luck**